# Rishibhih Krita Shiva Stuti

# ઋષિભિઃ કૃતા શિવસ્તુતિઃ

## Document Information

Text title : Rishibhih Krita Shiva Stuti

File name : RRiShibhiHkRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 25 | 4-27||

Latest update : September 15, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 15, 2023

*sanskritdocuments.org*

# ઋષિભિઃ કૃતા શિવસ્તુતિઃ

કણ્વઃ -
ઉપમન્યુવરપ્રદોરુમન્યો શતમન્યો કૃતદક્ષશિક્ષ શમ્ભો ।
સુરમૂર્ધસરિન્નગેન્દ્રકન્યાવર મન્યેઽહમવૈમિ ભક્તિધન્યમ્ ॥ ૪॥

ગિરિવરધનુશ્શરમુરહર વરકાકોદરહારમૌર્વીક ।
ઉર્વીરથ રથિકાગ્રે પ્રવિજેતઃ પુરહન્ભવાદ્ય પાહિ ॥ ૫॥

કુસુમશરારિપુરારિપાદપદ્મે પ્રવિશ તરારિવ શિવ પ્રકૃષ્ટપાર્થઃ (?) ।
મનસિજમનસા જગત્પ્રમુગ્ધં હર મુગ્ધેન્દુકિરીટકોટિજૂટ ॥ ૬॥

વિશ્વામિત્રઃ -
હેમામ્બુજોદ્ભવષડાનનવારણાસ્યસંસેવિતાઙ્ઘ્રિકમલં તરુણેન્દુચૂડમ્ ।
મન્દારવૃન્દપરિવન્દિમુકુન્દનેત્રપાદારવિન્દમગજાપતિમાશ્રયામિ ॥ ૯॥

નાગનાગનગવાસકૃત્તિધૃગ્ભૂરિહારસુગ્વીરકુમાર ।
મારમારકરવીરસુમાદ્ય સ્રગ્ધરામરવરાવ મહેશ ॥ ૧૦॥

કપિલઃ -
ગઙ્ગોત્તમાઙ્ગ શશિસઙ્ગ ભુજઙ્ગસઙ્ગ
    તુઙ્ગોત્થિતાઙ્ગ વૃષભાઙ્ગ મહેશ શ ૃઙ્ગ ।
શ્રીવ્યોમકેશ ભવભઙ્ગભુજઙ્ગ શમ્ભો
    પાહીશ માં તવ દયાપ્રસરૈરપાઙ્ગૈઃ ॥ ૧૩॥

યામિનીરમણખણ્ડધારિણં કામિનીવિધૃતમામિવિગ્રહમ્ ।
સ્તૌમિ દેવમગજામનોહરં નૌમિ કાયમનસા સદૈવ તમ્ ॥ ૧૪॥

દુર્વાસાઃ -
અભેદ્ય વેદ્યોત્તમ વેદવેદ્ય વિદ્યુત્પ્રભોદ્યત્સુકપર્દ શમ્ભો ।
વિદ્યાઽપ્યવિદ્યાઽપિ ચ તે કટાક્ષતઃ સુદ્યોતતેઽદ્યૈવ વિનાશમેતિ ॥ ૧૬॥

ઉડુગણરતિચૂડં હૃજ્જડાનાં ચ દૂરં

મૃડમજડમવેદ્યં વેદવેદાન્તસઙ્ગૈઃ ।
દૃઢતરહૃદયાબ્જે ગાઢમાલિઙ્ગ્ય દેવીં
સ્થિતમનલશિખાગ્રે શૂલપાણે મજે ત્વામ્ ॥ ૧૭॥

ભૃગુઃ -
અજગજપુરમારદક્ષશિક્ષં યમભગમુરવૈરિગર્વનાશમ્ ।
જનવનપિતરં ઋષિં મહેશં મનસા યામિ કલાધરોરુમૌલિમ્ ॥ ૨૦॥

જનકં શ્રુતિગીતમેનમેકં વિધિવિષ્ણ્વિન્દ્રયમાનિલાનલાનામ્ ।
મરુતાં પિતરં મહેશમાદ્યં શ્રુતિવેદ્યં પરમં નતોઽસ્મિ પૂજ્યમ્ ॥ ૨૧॥

સનન્દઃ -
અનીશં ત્વામીશં વદતિ રુશતીભિઃ શ્રુતિતમા
સનાથં ત્વામાદ્યં ભવહરમ સેદ્યં હિ કરણૈઃ ।
અસઙ્ગં સઙ્ગેષુ પ્રથિતપરમાનન્દમધુરં
ધરાનીરવ્યોમ્નાં પવનતપનૈરેવ જગતિ ॥ ૨૩॥

પશુપિશિતહુતાશતર્પિતાશાઃ કથમધુના સુરા હિ સપ્રકાશાઃ ।
શરણાય ભવન્તિ નારકાણાં કરુણાવારિનિધિં વિહાય દેવમ્ ॥ ૨૪॥

સાનન્દઃ -
અનશનમનનૈરુપાયસઙ્ઘૈર્ન હિ મોદાય ન વૈનસાં ક્ષયાય ।
અવનીતલપાલસન્નિધૌ પ્રણામઃ તવ ભક્ત્યા સુકરો હિ બન્ધમુક્ત્યૈ ॥ ૨૬॥

રમારમણકારણં વિધિહરીન્દ્રસન્તોષણં
ગરારુણગલાન્તરં કુસુમબાણસંશોષણમ્ ।
ભજામિ પવનાશિતપ્રથિનહારબાણાસની-
કૃતાગપતિકન્ય કાપતિમપારવેદૈષણમ્ ॥ ૨૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે ઋષિભિઃ કૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૨૫ । ૪-૨૭॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 25 . various 4-27

Notes: Ṛṣi-s ઋષિ; namely Kaṇva કણ્વ, Viśvāmitra વિશ્વામિત્ર, Kapila કપિલ, Durvāsā દુર્વાસા, Bhṛgu ભૃગુ, Sananda સનન્દ and Sānanda સાનન્દ, worship and eulogize Śiva શિવ.

Proofread by Ruma Dewan

*Rishibhih Krita Shiva Stuti*

pdf was typeset on September 15, 2023

Please send corrections to *sanskrit@cheerful.com*